<u>ब्रेन इंटरनेशनल स्कूल</u>

विषय - संस्कृत　　　　　　कक्षा -नव　　　　अभ्यास पत्र, नवंबर **2024-25**

प्रश्न **1** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।

एकदा पंजाबराज्यस्य नृपः महाराजः रणजीतसिंहः आखेटाय सैनिकैः सह वनमगच्छत्। ते एकस्मिन् स्थाने वृक्षस्य अधः वार्त्ताम् कुर्वन्ति स्म तदैव एकं प्रस्तरं तस्य दक्षिणे नेत्रे अपतत्।तेन तस्य तन्नेत्रे अतीव पीड़ा उत्पन्ना अभवत् तस्माच्च नेत्रात् रक्तबिन्दवः अपि अपतन्।महाराजः पीडया तत्रैव उपाविशत्।तदा तस्य सैनिकाः एकां स्त्रीं गृहीत्वा तत्रानयन्।सैनिकाः कथितवन्तः - "नृपेन्द्र! इयमेव अपराधिनी महिला भवन्तं पीड़ितम् अकरोत् अतः एतस्यै दण्डयतु भवान्।" नृपः ताम् अवदत्- "अहम् तव अपराधी नासम्।त्वां प्रति किञ्चित् कथितमपि न। पुनः कथं त्वं माम् आहतं कृतवती?" रोदन्ती सावदत्- "महाराज! गृहे मम बालाः बुभुक्षिताः सन्ति अतः अहं प्रस्तरखण्डैः एतस्य वृक्षस्य फलानि अत्रोटयम्।"परं दुर्देववशात् प्रस्तरं भवन्तं अपीडयत्।क्षमस्व माम्।अहम् अज्ञाने एव ईदृशं कृतवती।पुनः कदापि ईदृशम् अपराधं न भविष्यति।"इदं श्रुत्वा दयालुः नृपः तां स्त्रोम् अमोचयत्।

**I एकपदेन उत्तरत-**

i) नृपस्य नाम किम् आसीत्?

ii) नृपः नेत्रात् के अपतन्?

**II पूर्णवाक्येन उत्तरत-**

i) सैनिकाः किं कथितवंतः?

ii) रोदन्ती स्त्री किम् अवदत्?

**III भाषिक कार्य़म्-**

i) 'गृहे मम बालाः ......।अत्र 'मम' पदं कस्मै प्रयुक्तम्? ( स्त्रियै/नृपाय/सैनिकाय/वृक्षाय)

ii) अनुच्छेदे 'पाषाणम्' इति पदस्य कः पर्यायः आगतः? (वार्त्ताम्/नृपम्/अपराधम्/प्रस्तरम्)

iii) ' दयालु नृपः' अत्र विशेषणपदं किम्? (नृपः /दयालुः / नृप/ दया)

iv) अस्य गद्यांशस्य कृते उचितं शीर्षकं लिखत।

प्रश्न **2** अधः प्रदत्तचित्रस्य वर्णनं मञ्जूषायाः सहायतया पञ्चसु वाक्येषु संस्कृतेन कुरुत।



| |
|---|
| क्रीड़ाक्षेत्रम्, छात्राः, विद्यालयस्य , क्रीडन्ति , पादपन्दुकेन , क्रीडाकांलाशे , विकासः , भवति , क्रीडाशिक्षकः , अस्ति , अतिविशालम् , स्वस्थाः |

प्रश्न **3** भवान् नवेन्दुः जन्मदिवसोत्सवे कालपटिकां वाञ्छति। तदर्थं पितरं प्रति लिखितं पत्रं मंजूषायाः उचितं पदं चित्वा पूरयत।

**1...........** ।
दिनांकः...........

परमादरणीयाः पितृमहाभागाः
सादरं प्रणमामि।
**2..............** कुशलं तत्रास्तु। भवता स्वपत्रे पृष्टं यत् जन्मदिवसस्य **3..............**अहम् किम् वाञ्छामि। अहं तु **4...............** कालघटिकाम् इच्छामि। छात्रावासे सर्वाणि कार्याणि **5...............** भवन्ति परं निश्चितसमयात् भोजनव्यवस्थां न वर्तते। प्रातः पंचवादने जागरणम् **6..............** ।अतः नियमपालनाय घटिका अत्यावश्यकी। अनया **7..............** दैनिकार्येषु अपि नियमितः भविष्यामि। शेषं सर्वं **8..............**। मम जनन्यै अग्रजाय च सादरं **9..............** ।

भवदीयं प्रियपुत्रः
**10..............**

| |
|---|
| अत्र ,यथासमयम् ,अत्यावश्यकम् ,प्रणामाः ,छात्रावासः ,उपहाररूपे ,एकाम् ,कुशलम् ,अन्येषु ,नवेन्दुः |

प्रश्न 4 अधोलिखितवाक्येषुरिक्तस्थानानिमञ्जूषायांप्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखत।

मञ्जूषा - **कदापि, यावत्, श्वः ,मा,किमर्थम्**

क) .................मम मातुलः काश्मीरात् आगमिष्यति।
ख) असत्यं ................. वद।
ग) .................स्थास्यन्ति गिरयः तावत् रामायणी कथा प्रचरिष्यति।
घ) कच्छपः .................न धावति।
ङ) अस्माकं जीवनं ................. वर्तते।